दिगुणयुक्ताः सर्वे देवाः कर्णेभिः अस्मदीयैः श्रोत्रैः भद्रं भजनीयं कल्याणं वचनं शृणु
याम युष्मत्प्रसादात् श्रोतुं समर्थाः स्याम अस्माकं बाधिर्यं कदाचिदपि मा भूत्। हे यजत्राः या २९

गेबुच्चपुरोडाशादिभिः यष्टव्यो देवाः अक्षिभिः आत्मीयैश्चक्षुभिः मद्रंशोभनं रूपं द्रष्टुं समर्थाः स्या
मः अस्माकं दृष्टिप्रतिघातोपि माभूत्॥ स्थिरैरंगैः दृढैर्हस्तपादाद्यवयवैः। तनूभिः शरीरैश्च
युक्तावंतुष्टुवांसः। युष्मान्नस्तुवतो यदायुः षोडशाधिकशतप्रमाणं विंशत्याधिकशतप्र
माणं वा। देवहितं देवेन प्रजापतिना स्थापितं तद्व्यशेम प्राप्नुयाम कर्णेभिः बकुकं घं
दसीतिभिः सएस्ताव। अक्षिभिः दस्यपि दृश्यते। इत्यनन्तरम्॥ ॥शंन इंद्राग्नीत्यस्या
मैत्रावरुणिर्वसिष्ठो विश्वेदेवास्त्रिष्टुप्॥ शंन्न इंद्राग्नी भवतामवोभिः शंन्न इंद्रावरुणा
रातहव्या॥ शमिंद्रासोमा सुविताय शं योः शंन इंद्रापूषणा वाजसातौ॥ नो अस्माकं अ
स्मभ्यं वा इंद्राग्नी अवोभिः रक्षणैः शं शांत्यै भवतां। इंद्रासोमावपि नः शं शांत्यै सुवि
ताय कल्याणाय च भवतां॥ शं शांत्यै शं योः सुखाय च पुनरुक्तिरादरार्था। अथवा शं शम

नहेतुकं सुखं योगनिमित्तं सुखं इत्यशुनहुतिः॥ तस्मैभवतां इन्द्रा पूषणावपि वाजसातोस्तु
२४ द्धेऽन्नलाभनिमित्ते च नः शंभ्वां ते भवतामित्यर्थः॥ ॥ सुखेजनं सुव्रतमित्यस्याः बार्हस्प
त्यो भरद्वाजो विश्वेदेवास्त्रिष्टुप्॥ सुषेजनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सुम्नयंता।
तआगमन्तु तइह श्रवंतु सुक्षत्रासो वरुणो मित्रो अग्निः॥ सुषेजनमिति सुव्रतं सुकर्माणं
25 जनं दैव्यं जनं देवसंघं नव्यसीभिर्नवतराभिर्गीर्भिः स्तुतिभिः सुषे अहं स्तुवे। तथा मित्रा
वरुणा मित्रः च प्रमिता त्रायकः वरुणः पापान्निवारयिता। एतावपि देवौ स्तुये मिकी दृशौ
सुम्नयंता सुम्नं सुखं स्तोतृणामिच्छंतो सुहक्षत्रासः ते वरुणादयः सर्वे देवा इहअ
स्मिन्यज्ञे आगमन्तु आगच्छंतु। ततो दशाः श्रवंतु अस्मदीयास्तुतीः श्रवंतु वि। अत्र
मित्रादीनां परिगणनं सूपलक्षणं। सुतस्य सर्वे देवताः प्रतिपादकत्वात्। अतएवं पूर्वे २७
जनमिति सामान्यनिर्देशः॥ ॥ कयानश्चित्रा अभुवदूती सदावृधः सखा। कयाशचिष्ठया

ष्टता॥ कयानेतितिसृणांगौतमोवामदेव इंद्रोगायत्री॥ अभीषुण इतिपादनिचृत्॥ सदावृधः
सदावर्धमानः। चित्रः चायनीयः पूजनीयः। सखामित्रभूत इंद्रः कयाऽजत्यातर्पणेनो अस्मा
नाभुवत्। अभिमुख्येनभवेत्। शचिष्ठयाप्रज्ञावत्तमयाप्रज्ञया। आहिमनुष्ठीयमानेनवृत्याहृता
केनवर्त्तमानेनकर्मणा च अभिमुख्योभवेत्॥ ॥कस्त्वासत्योमदानांमंहिष्ठोमत्सदंधसः। दृ
ळ्हाचिदारुजेवसु॥ मंहिष्ठः पूजनीयः। सत्यः सत्यभूतः। मदानांमादयितॄणांमध्येकोमदकरः
अंधसः सोमस्यरसः। दृढान्यपिवसूवसूनिशत्रूणांधनानिआरुजे। आसमंतात्भंक्तुं।
हेइंद्रत्वांमत्सत्मादयेत्॥ ॥अभीषुणः सखीनामविताजरितॄणां। शतंभवास्यूतिभिः।
हेइंद्रत्वंसखीनांजरितॄणांअविता रक्षिता॥ त्वंशतंशतेनबह्वीभिरूतिभिः सहनोअस्मा
कंसखा अभिवासिअभिमुख्योभव॥ ॥स्योनापृथिवीत्यस्याः कण्वोमेधातिथिः पृथिवी
गायत्री॥ स्योनापृथिवीभवानृक्षरानिवेशनी। यच्छानः शर्मसप्रथः॥ हेपृथिवीस्योनासुखा
दिगुणसंयुक्ताभव। स्योनशब्दोविस्तीर्णवाची। तथाचवाजसनेयब्राह्मणेस्योनशब्दोपेतं

२५ कंचिन्मंत्रमुदाहृत्य व्याख्यातं द्रस्योरुमी विशस्योनमिति विस्तीर्णं विस्तीर्णमित्येयत दाहेति।
यद्वास्योनशृदः सखवाची। अन्तक्षशब्दं टकाररहितानि वृक्षानीति घात तस्वं नभस्तासप्रथमः
विस्तारयुक्तं शर्मशरणं नो अस्मभ्यं यच्छतु हे पृथिवी धेहि। अतिश्रवणे महानाम्नीरुची
व्याख्यास्यामः॥ ॥अथ महाव्रतप्रयोग उच्यते॥ उपनिषदिति एष पंथा इत्यारण्यकद्वयं
तत्र मंत्रा उच्यंते॥ तत्र उपनिषद्व्रतं। पूर्ववदुदगयनापूर्वकाले स्वस्तिवाचनं नांदीश्राद्धं
विधायाऽपरेद्युः आचार्यः महाव्रतवतब्रह्मचारिणः वापनादिपरिदानांतं होमं तत्र स
माप्य नवमौंजीदंडौ तेदत्वा स्विष्टकृदादिहोमशेषं समाप्य संवत्सरमेतद्व्रतं चरेति मंत्रा
व्याख्याताः॥ ॥अथ गोदानिकं॥ गोदानमिति कर्मनामधेयं॥ गोदानमिति श्रोत्रयोरुप
रिदेशस्तेन तद्वपनं लक्ष्यते॥ यद्वा गायो लोमानि वृश्चथ मो रवगबाणलोमस्पृशंति ते बावप २८
नं इदं षोडशवर्षवेश्यायेचोलेवत्॥ इति गोदानिकं॥ अत्रत्यमंत्राश्चौले व्याख्याताः॥॥

अथसमावर्त्तनं॥समावर्त्तनमितिगुरुकुलान्निरत्तिः॥इदंकर्मविद्यांतेकर्त्तव्यं।ग्रामाद्बहिरैशान्यां
दिशिगत्वापलाशंपूजयेत्।चोलवत्सर्वंकृत्वा।मंत्राःकृतिचिच्चौले व्याख्याता।विशेषस्तु
त्रायस्वेनं।अस्मिन्नर्थेत्रायस्वमामितिव्याख्येयं॥विशेषस्तु॥युवंवस्त्राणीति।अस्याःऔ
तथ्योदीर्घतमामित्रावरुणौत्रिष्टुप्॥युवंवस्त्राणिपीवसावसातेयुवोरछिद्रामंतवोहस
र्गाः॥अवातिरतमनृतानिविश्वऋतेनमित्रावरुणासचेथे॥युवंयुवांपीवसामीयान्यछि
द्रानिवस्त्राण्याछादनयोग्यानिवासांसिवसाथे।आछादयेत्यर्थः।यद्वापीवसास्थूलेनप्र
भूतेनतेजसावस्त्राणिदधाथे।अविछिन्नानिवस्त्रस्थानीयानितेजांसिधारयथेत्यर्थः।
किंच।युवोयुवयोःसर्गाःसृष्टयःअछिद्राःअछिन्नामंतवोमननीयाश्चदिदृशे।युवांविश्वावि
निसर्वाण्यनृतानिअसत्यानि।अधियानिपापानिअवातिरतं।नाशयतंसंहितायांछत्य
वःइतिप्रकृतिभावादस्यत्वंच।ऋतेनपापेनतत्साधनेनयज्ञेनवांसचेथेसंगछथ॥अस्म

२६ भ्यंयोजयत्यर्थः॥ अंजनधारणे॥ अश्मनस्तेजोसि चक्षुर्मे पाहि। हेजन त्वं अश्मनः धातुरूपस्य
पाषाणस्य तेजः आराणसि त्वमसि निधानात्मे चक्षु पाहि रक्ष॥ ॥कुंडलधारणे॥ अश्मनस्तेजो
सि श्रोत्रं मे पाहि। हे कुंडल त्वं अश्मनो धातुरूपस्य पाषाणस्य तेजः सारो हि अश्मरत्नं ते
28 स्वचितत्वात् तत्तेजस्त्वं मे श्रोत्रं पामे पाहि॥ भूषयेत्यर्थः॥ ॥स्रग्धारणे॥ अनाप्तोस्यना
प्तोहं भूयासं॥ हे स्रक् त्वं अनाप्तोसि अदुःखिता सुखसाधनत्वात्। सुखरूपासीत्यर्थः
अंजनधारणे॥ अतस्त्वद्धारणात् अहमपि अनाप्तः सुखी भूयासं॥ ॥उपानहावास्था
ने॥ देवानां प्रतिष्ठस्थः सर्वतो मां पातं। हे उपानहौ युवां देवानां द्योतमानानां प्रतिष्ठस्थः।
प्रस्थानसाधने भवथ। युवयोराक्रमणेन मां सर्वतः कंटकादिभ्यः पातं रक्षतं॥ ॥छत्र
धारणे॥ दिवः छद्मासि। हे छत्र त्वं दिवः आकाशस्य छद्मासि छादनमसि। ततः पातश्चात
पं निवारयेत्यर्थः॥ ॥दंडधारणे॥ वेणुरसि वानस्पत्योसि सर्वतो मां पाहि। हे दंड त्वं वेणु २९
रसि वेणुरूपोसि वानस्पत्योसि वनस्पतिसंबंधोसि सर्वतो गोस्पर्शादिभ्यो मां मां पाहि

रक्ष ॥ ॥ कंठमालां धारये । आयुष्यं वर्चस्यं रायस्पोषमउद्भिदं ॥ इदं हिरण्यं वर्चस्वज्जैत्रायावि
मिषतादु मां ॥ आयुष्यो निमित्तं रायस्पोषं रायो धनस्य पोषं पुष्टिहेतुं सर्वस्य धनस्य हिर
ण्यमलंकुर्यात् । औद्भिदं उद्भिद्य जायते ॥ उद्भिदमेव औद्भिदं । इदं हिरण्यं वर्चस्वेति । वर्चसे
तेजसे । जैत्र्यं पतेजय हेतुं जैत्र्यं कर्मत स्मै जयायेव वा इमां तनुमाविषतात् । आविषतु ॥
अलंकरोत्वित्यर्थः ॥ ॥ उच्चैर्वाजि पृतनाषाट् सभासाहं धनंजयं ॥ सर्वाः समग्रा ऋद्धयो हि
रण्येऽस्मिन्त्समाहिताः ॥ उच्चैर्वर्जयतीति उच्चैर्वाजि हिरण्यं तोउच्चैर्वदाति । पृतनाषाट्
पृतनां सहते अभिभवतीति पृतनाषाट् । सभासाहं सभां सहते अभिभवतीति प्रभीकरोती
ति सभासाहं । धनंजयं शत्रुसंबंधिनो धनस्य जेतुं । सर्वाः समस्ताः । समग्राः संपूर्णाः
ऋद्धयः अस्मिन्हिरण्ये समाहिताः ॥ ॥ शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ । तेन मां
सूर्यत्वचमकरं पुरुप्रियं ॥ शुनमिति सुखनाम । सुखकरं हिरण्यनाम । अहं जग्रभ ।

२७ उच्चारयामि। जग्रमे। हि इकारस्य मकारः छांदसः॥ पितुर्नामेव यथा पुत्रः पितुर्नाम पुनः
पुनः कीर्तयति तद्वत्। हे हिरण्य तेन त्वयि इमां सूर्यं त्वचं सूर्यवद्दीप्तत्वचं तथा पुरुषम
नुष्येषु यमकरं हिरण्यधारणात् हि पुमान् दीप्यते लोकप्रियश्च भवति॥ ॥सम्राजं च
विराजं चाभिषिर्या च मे घवा॥ लक्ष्मी राष्ट्रस्य या मुखे तया मामिंद्र संसृज॥ हे इंद्र अभिषिः
27 अभिषिता या लक्ष्मी मघवा। या च लक्ष्मी राष्ट्रस्य मुखे मुख्ये राज्ञि तिष्ठति सम्राजं स
म्यक् दीप्यमानं विविधं दीप्यमानं मां तया लक्ष्म्या संसृज। संयोजय॥ ॥अग्ने प्रजातं परि
यद्धिरण्यं ममृतं जज्ञे अधि मर्त्येषु। य एतद्वेद स हि देनदर्हति जरा मृत्युर्भवति यो बिभर्ति॥
यद्धिरण्यं अग्नेः सकाशात् प्रजातं हिरण्यरेतस्त्वात् तद्धिरण्यं मनुष्येषु अमृतं अनश्वरं।
अधिजज्ञे। एतत् पुमान् एतदिदं हिरण्यं इदृशमिति वेद अमृतं हिरण्यमिति स्मरते॥
स इत् स एव एतदर्हति॥ एतत्प्राप्तुमर्हति किंच॥ यो बिभर्ति कुंडलाद्याभरणाद्भूषणा सज ३०

रामृत्युर्भवति।जरयानाशको भवति॥अलंकारवान्पुरुषः॥जराक्रांतोपि लोकेषु वेवमाती
त्यर्थः॥ ॥यद्वेदराजावरुणो यद्वुदेवीसरस्वती॥इंद्रोय दृत्रहावेदतन्मेवर्चसे आयुषे॥वरु
णोराजायद्धिरण्यं वेदसरस्वती देवीयद्वेदइंद्रोय दृत्रहाउपलक्षणमेतत्॥सर्वदेवेषु प्रसि
द्धमित्यर्थः॥ ॥नतद्रक्षांसि नपिशाचास्तरंति देवानामोजः प्रथमजं ह्येतत्॥योबिभर्त्ति दा
क्षायणं हिरण्यं सदेवेषु कृणुते दीर्घमायुः॥समनुष्येषु कृणुते दीर्घमायुः॥रक्षांसि पिशा
चाः तद्धिरण्यं प्रतिनतरंति॥तद्धिरण्यं देवानां प्रथममोजो हि दाक्षायणं दाक्षायणीगौरी
तत्संबंधं दाक्षायणं तया प्रथमं धृतत्वात्॥एतादृशं हिरण्यं योबिभर्त्ति सदेवेषु मध्ये दी
र्घमायुः कृणुते स एव मनुष्येषु दीर्घमायुः कृणुते आत्मन इति शेषः॥आयुष्यमिति पूर्वस्या
मपि ऋचि उक्तत्वात्॥ ॥यदाबध्नं दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः॥तन्मआ
बध्नामि शतशारदायायुष्मान्जरदष्टिर्यथासन्॥दाक्षायणा दक्षपुत्री गौरी तिस्रस्या

२८ नेव्यत्ययेनयप्रा। कीदृशी स्मनस्यमाना। सोमनस्ययुक्ता सती। शतानीकायसशतमपरिमितो
अनीकं दक्षाद्यैः सह युक्तं यस्य सः। शिवः अत एव श्रीरुद्रेस्यशतेषु युद्धमिति वा रुद्रोस्त
वेहेतयः इति युद्धसाधनानां मुक्ता। तस्मै शतानीकाय तदर्थं तत्प्रियार्थं यद्धिरण्यं माबध्ना
28 मि। आसमन्ताद्बध्नामि तद्धिरण्यमेमम शतशारदाय शतशारदाय शतं शरदं जीवनाय
आबध्नामि अकंकारत्वेन धारयामि॥ यथा एतद्धारणे उन आयुष्मान्जरदष्टिः जीर्णाश
न्स्यअसन्। असंलेटि व्यत्ययेन प्रथमपुरुषः॥ ॥ धृताद्वल्लुप्तं मधुमत्सुवर्णं धनंजयं ध
रुणं धारयिष्णु॥ ऋणक्सपत्नादधरांश्च कृण्वदारोहमां महते सौभगाय॥ धृताद्धृत। धृता
दपि महत्। तस्य हिरण्ये लभ्यत्वाभासितं। लोकभासने इत्यस्मात्क्प्रत्ययः। यः मधुमत्वमा
धुर्यो पेतं धरुणं धारकं प्राप्य धारयिष्णु। जगधारणशीलं। सुवर्णं शोभनवर्णं एवं भूतं
हे हिरण्य यं हिरण्यत्वं सपत्नानृशत्रूनृऋणन्कृ धन्नाअधरांश्च कृण्वन्नन्यकृतांश्च कृ ३३

एवन्कुर्वन्न्महते सौभगाय सौभाग्याय मामारोह। मयि स्थिरं भवेदित्यर्थः॥ ॥प्रियं मा कृ
णु देवेषु प्रियं राजसु मा कुरु॥ प्रियं विश्वेषु गोत्रेषु मयि धेहि रुचा रुचं॥ हे हरे एव मामा मां
देवेषु मध्यत्वाद्वारणादानाच्च प्रियं कुरु। स्नेहपात्रं प्रियः प्रजानां दातेति वचनात्। तथा
राजसु राज्ञां मध्ये प्रियं कुरु। विश्वेषु गोत्रेषु अस्मत्संबंधिषु धलेषु प्रियं कुरु रुचा स्वभय
धेहि। तोत्ततीयारुड्डिमितं कांत्यर्थो द्रुहत्तिरादरार्था। मयि धेहि स्थापय। तत्प्रधानमिति
शेषः॥ ॥अर्वाञ्चमिंद्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः। इमं नो यज्ञं विहवे जुषस्वा
स्य कुर्मो हरियो मेदिनं त्वा॥ अमुतः अमुष्मान्मध्यं यमस्थानात् दिवो वा अर्वाञ्चं अभिमु
खं इंद्रं हवामहे। आह्वयामः। यः गोजित्। गवां उदकादीनां जेता। धनजित्। धनानां अश्वा
दीनां च यो जेता। स त्वं नो अस्माकं यज्ञं विहवे स्पर्द्धास्थाने संग्रामादौ। जुषस्व सेव। अस्म
ज्जयार्थं हे हरिवः मरुवसोरिति रुत्वं। अस्य यजमानस्य मेदिनं स्नेहवं तत्त्वं कुर्मः॥ तस्मा

२९ दिमत्रस्मघ्नंजुषस्यसेवस्व॥ ॥नुपांरसमिधादाने॥स्मर तंयमे अ॥स्मर तंयमे तन्मेउभयव्रतं।
निंदाचमेइत्यादिद्वादशाप्येवमेवोक्ता यथा पाठमथोत्तरं॥यदग्नेसेंद्रस्यसप्रजापतिकस्य
समनुष्यस्यसमनुष्यराजन्यस्यसाकाशस्यसातीकाशस्यसान्तकाशस्यसहारएयेश्वप
शुभिःयाम्येश्वयन्मआत्मआत्मनिव्रतं तन्मेसर्वव्रतमिदमहमग्नेसर्वव्रतोभवामिस्वाहा
२ हेअग्नेसेंद्रादिगुणविशिष्टस्य तवाधीनंत्वय्यपिसमर्पितं तेनानेनसर्वप्रकारेणाव्रतेन
संपूर्णसर्वव्रतोभवामि॥अनेनव्रताधिष्ठात्रत्वंश्रूयते॥यमग्नेव्रतपाअसीत्यत्रकीदश
स्याग्नेसेंद्रस्येंद्रसहितस्यउत्तराविं—सप्तविशेषणानिस्पष्टानि।मनुष्यराजन्य इतियमः॥
अनेनेंद्रादीनांस्वस्वव्यापारेष्वग्न्याधीनत्वंविवक्षितं।पुनः कथंभूतस्याग्नेःसाकाशस्य
आकाशःअवकाशःतेनसहितस्यअवकाशाभावेअग्नेःपाटवान्।सातीकाशस्यअ 32
तीकाक्षोगवाक्षःयज्ञगृहेभुतत्सवितस्यसाचुकाशस्यअवांतरहावाक्षसहितस्यस

प्रतीकाशस्य प्रतीकाशं। सदृशः आत्मसदृशः॥ अग्न्यंतरसहितस्य सआहवनीयादिमूर्तिभे
दविचक्षणपाइदं विशेषणं सदेवमनुष्यस्येत्यादि विशेषणं चतुर्थपंक्तितीयपञ्चसाहित्यं
विविक्त्याएतादृशस्य अग्नेरधीनं ममव्रतमित्यन्वयः॥ समिदाधानं॥ ॥ममाग्ने वर्च इति
सखिलस्य दशर्चस्य सूक्तस्य आंगिरसो विहव्यो विश्वेदेवास्त्रिष्टुप्॥ अंत्या जगती॥ ममा
ग्ने वर्चो विहवेष्वस्तु वयं त्वेधानास्तन्वं पुषेम॥ मह्यं नमंतां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना
जयेम॥ हे अग्ने विधमारूपं ते एधितिविहाया॥ संग्रामेषु यज्ञेषु यज्ञेषु वा य वर्चो दीप्तिः त्वत्प्र
सादात् ममास्तु भवतु। वयं च मह्यं मदर्थं चतस्रः प्रतिदिशः प्रकृष्टा दिशः तद्वासिनो जना इ
त्यर्थः नमंतां स्वतएव प्रह्वीभवंतु त्वया अस्माभिर्हविर्भिः प्रवर्धिते तत्र अध्यक्षेणाध्यक्षेण स
ता पृतनाः जयेमाभिभवेम॥ ॥ममदेवा विहवे संतु सर्व इंद्रवंतो मरुतो विष्णुरग्निः॥ ममां
तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन्॥ सर्वे देवाः विहवे संग्रामे यज्ञे वा म
म संतु ममैव साधका भवंतु॥ के पुनस्ते। इंद्रवंतः इंद्रेण संयुक्ताः मरुतो विष्णुरग्निश्च तथा

३० अंतरिक्षं मम उरुलोकं विस्तीर्णप्रकाशमस्तु। लोकदर्शनेनेति घञ्। लोकः आलोकः प्रकाशः उरु
लोकोऽस्येति बहुव्रीहौ सर्वपदप्रकृतिस्वरत्वं अपि च अस्मिन्कामे कामितव्ये पाले निमित्तभूते
30 सति वातो वायुः मह्यं पवतां अनुगुणं प्रवातु पवमेवादिकः॥ ॥मयि देवा द्रविणमाय
जंतां मयि आशीरस्तु मयि देवहूतिः॥ दैव्या होतारो वनुषंतु पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः॥
देवाः सर्वे द्रविणं धनं मयि स्तोतरि आयजंतां गमयंतु मह्यं ददत्वित्यर्थः। आशीराश्रयणीयं
यज्ञपालं च मध्ये वास्तु हे देवा तां कृतिज्ञानमस्मिन्निति देवहूतिः यज्ञः स च यस्तु। अपि च दे
वानामिमे दैव्याः देवायमिति यञ् तादृशो होतारः साधु होमनिष्पादकाः मदीया ऋत्विजः पू
र्वे अन्यदीयेभ्य ऋत्विग्भ्यः प्रथमभाविनः संतं वनुषंत देवान् संभजतां वयं च तत्याः शरीरेण
अरिष्टाः अहिंसिताः अविराः सुवीराः सुपुत्राश्च स्याम भवेम॥ ॥मह्यं यजंतु मम यानि ह ३२
व्याहूतिः सत्या मनसो मे अस्तु॥ येनो माऽनिगां कतमच्चनाहं विश्वेदेवासो अधिवोच्यतानः॥
महं मदर्थं यजंतु ऋत्विजो देवान् हविर्भिः यजंतु य वाषष्ठ्यर्थे चतुर्थी। मह्यं मदीया ऋत्विज

इत्यर्थः। मम भूतानि यानि हव्यानि हवींषि च। पुरोडाशादीनि च सन्ति ते हविर्भिरित्यर्थः। तथा मे म
नसः आकूतिः संकल्पनं अभीष्टस्य प्रार्थनं सत्याः यथार्थाः सन्तु। अपि च अहं कृतमघानि कि
मपि एनः पापं। मा निगां नियतं निकृतिरं वा मम गच्छेयं पापं मा कार्षमित्यर्थः। अपि च हे विश्वे
देवाः ये देवाः यूयं नोऽस्मान् अधिवोचत विदादिषु पक्षपातेन ब्रूत॥ ॥देवीः षडुर्वीरुरु
नः कृणोत विश्वे देवास इह वीरयध्वं॥ मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सो
म राजन्॥ हे षडुर्वीः षट्संख्याका उर्व्यः एताश्चान्यत्राम्नायते षामोर्वीरिति री हश्यो हे वी
देव्यः उरुभिः स्तीर्णधनं नोऽस्मान् कृणोत कृणुत कुरुत हे विश्वे सर्वे देवासो देवा यूयं च
इह अस्मिन् धनप्राप्त्ये विषये वीरयध्वं विक्रामयत यथा वयं तल्लभते। लभेमहि तथा
वीर्यवन्तो यूयं प्रयतत्वमित्यर्थः। वीरविक्रान्तौ॥ अपि च प्रजया पुत्रादिरूपया मा हास्महि व
यं मा परित्यज्येमहि मा परित्यज्याम इत्यर्थः॥ तथा हे राजन् राजमानय दास्माकं स्वामिन्।

३३ हे सोम द्विषतेऽप्रीतं कुर्वते षष्ठ्यर्थे चतुर्थी द्विषतः शत्रोर्मीर धाम अयशं प्राप्नुयाम तथीत्यकु
र्वीत्यर्थः ॥ ॥ अग्ने मन्युं प्रतिनुदं परेषां नदब्धो गोपाः परि पाहि नस्त्वं ॥ प्रत्यंचो यंतु निगुतः पु
नस्त्वे ३ ये षां चित्तं प्रबुधां विनेशत् ॥ हे अग्ने परेषां शत्रूणां मन्युं क्रोधं न प्रतिनुदन् प्रतिमु
खं प्रेरयन् तिरस्कुर्वन् अदब्धः केनापाहि सित्ताः गोपाः गोपायिता ः इदृशस्त्वं नोऽस्मा
31 न् परिपाहि । परितः सर्वतः सर्वतो रक्षते शत्रवः प्रत्यच प्रत्यंचतः प्रतिनिवर्तमानाः । निगु
तः निगुताद्व्येत्रे भाष्ट्र आप्रयात्रं शब्दं नितरां कुर्वतः पुनर्यंतु स्वकीयं स्थानं पुनर्गच्छंतु अ
पि च प्रबुद्धा प्रबुध्यमाना वा जनता मेषां शत्रूणां चित्तं ज्ञानसाधनं मनः अमा सह युगप
द्यनि विनेशत् । विनश्यतु । प्रत्येकाभिप्राये णैकवचनं ॥ ॥ धाता धातॄणां भुवनस्य यस्प
स्पतिर्देवं त्रातारमभिमातिषाहं ॥ इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पांतु यजमानं न्य ३८
र्थात् ॥ धातॄणां स्वष्टॄणामपि धाता स्रष्टा भुवनस्य कृत्स्नस्य भूतजातस्य यः पतिः सवि

तावापतिः पालयिता तं देवं देवनश्शीलं त्रातारं सर्वेभ्यो भयेभ्यः पालयितारं अभिमातिति
षाहं अभिमानिनां शत्रूणां सोढारं अभिभवितारं एवंगुणविशिष्टमिंद्रं सवितारं वा स्तोमी
ति शेषः ॥ उभाउ भो अश्विना अश्विनौ बृहस्पति च एतत्प्रमुखाः सर्वे देवाः इमं यज्ञमनुष्ठी
यमानं यजमानं चन्यथा निष्पादयात् पातात्। यद्वा अर्थस्य प्रयोजनस्य भावो न्यर्थः त
स्मात्कात् तु रक्षंतु सफलं कुर्वंत्वित्यर्थः ॥ ॥ उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहू
तः पुरुक्षुः ॥ स नः प्रजायै हर्यश्व मृळयेंद्र मा नो रीरिषो मा परा दाः ॥ उरुव्यचाः विस्तीर्ण
व्यापनः महिषो महान् पूज्यो वा पुरुहूतः बहुभिर्यजमानैराहूतः पुरुहूतः बहुनिवासः ।
यद्वा पुरुभिर्बहुभिः सेव्यमानः स्तूयमानः इंद्र ईदृषं इंद्र अस्मिन् हवे यज्ञे हूयंते अस्मि
न् हवींषीति हवो यज्ञः यद्वा अस्मिन् हवे त्वद्विषये आह्वानेनो अस्मभ्यं शर्म सुखं यंस

३२ त्वयच्छतु।ददात्वित्यर्थः।हे हर्यश्व हरी अश्वौ यस्य तादृशः हे इंद्र स त्वं नो अस्माकं प्रजायै
द्वितीयार्थे चतुर्थी।अच प्राचां पुत्रपौत्रादिकान्‌ मत्तं व्यस्करवद्य।नो अस्मान्‌ मा रिरीषो मा
३२ हिंसीः यावच परादाः परादानं परित्यागः म परित्याग इत्यर्थः॥ ॥येनः सपत्ना अपते भवं
त्विंद्राग्निभ्यां यवबाधामहे तां।।वसवो रुद्रा आदित्या उपरिस्पृशं नमोग्रं चेत्तारमधिरा
जमक्रन्‌।।नो अस्मा

३५

कं येन: सपत्ना: शत्रव: ते अपसवंतु अपगता भवंतु स्वस्थानादपगता: प्रच्युता भवंतु तत्सपत्नात् इंद्राग्नीभ्यां हवि
वंति एकत्या च प्रसन्नाभ्यां मनुगृहीता वयं अव वाधामहे निष्ठुतरं विनाशयाम: अपि च वसवो रुद्रा आदित्या मम मां उ
रि स्पृशं उन्नत पदस्पदां स्रष्टारं सर्वेभ्य: श्रेष्ठं हं अरून् कुर्वन्तु उग्रमुग्रुसां वलंचेत्तारं चेतितारं सर्वस्य ज्ञातारं मधिराजं राज्ञ
सर्वेषां अधीश्वरं वमो कुर्वंतु इति समावर्तनेन गुर्वनुज्ञागतस्य विवाहार्थं यातु: अशकुन परिहारार्थे मंत्रा: तेषां अर्थ: प्राणा
पानयो रुव्यचास्त्वया प्रपद्ये देवाय सवित्रे परिददामीति हे सवित: त्वया निमित्तभूतेन प्राणापानयो विषय सप्तमीतद्योर्दि
षयं सउरु महत् व्यचो व्याधनेयान्नि ये स्य स: प्राणापानयो योगस्य जीवन हेतुत्वात् दीर्घायुष्यदानित्यर्थ: तादृशो हं प्रपद्ये
त्वां प्रपन्नोस्मि अत एव सवित्रे परपित्रे देवाय तुभ्यं परिददामि मामिति शेष: त्वदधानकरोमीत्यर्थ: आमंद्रैरित्यस्या गाथि
पुत्रो विश्वामित्र इंद्रो वृहती आमंद्रैरिंद्र हरिभिर्याहि मयूररोमभि: मात्वा केचिन्नियमन्त्विन्न पाशिनो तिधन्वेव तां इहि
हे इंद्र मंद्रैर्मोदैस्त्रिभिर्मयूररोमभि मयूररोम स्वडुशरोम स्थूडुशरो मयुक्तै हरिभि रश्वै रूपेत स्वमायाभिर्हि यज्ञं प्रत्यागच्छ
केचिदपि जना त्वा मत्वा नियमन् मनियच्छंतु गमन प्रतिवंधं माकुर्वन्त्वित्यभिप्राय: प्रतिवंधे दृष्टांत: वियथा पाशहस्ता व्या

धाविगच्छंति पक्षिणो नियच्छंति तद्वन्मान्नियच्छतु ॥ किंच धनेन यथा वपांथाः धन्वमरुदेशं शीघ्रमभिगच्छंति तद्वद्गमनप्र
३९ तिबंधकारिणः स्थानं व्रतीत्य शीघ्रमह्यागच्छ ॥ शिष्यान्यंत्रणः महि त्रिमिति त्रिवस्य सूक्तस्य वारुणिः सत्यधृतिरादित्या
गायत्री महि त्रीणामवोस्तु द्युक्षं मित्रस्यार्यम्णः दुराधर्षं वरुणस्य त्रीणां गत्र याणां मित्रस्यार्यम्णो वरुणस्य च स्वभूतं द्यु
दीप्तं अत एव दुराधर्षं अन्यैर्धर्षयितुं वधितुमशक्यं महि महत् अवो रक्षणमस्माकमस्तु त्रीणामित्यपि छंदसि द्वयमतइति व
33 चनात् यादेशाभावः नहि तेषाममावूरमाध्वसु वारणेषु ईशे रिपुरघशंस अमेति गृहनाम अमाचन गृहेष्वपि तेषां
वरुणमित्रार्यम्णां तद्रक्षणं प्रगृहीतानां स्तोतॄणां वा अघशंसः अघमनर्थमाशंसमानो रिपुः शत्रुर्नहि सेनाहिनाशयितुं
हिंसितुमीष्टे नांतथा अध्वसु मार्गेषु वारणेषु यत्र पुरुषा निवार्यंते तेष्वपि वर्तमानेषु शत्रुर्निवारयितुं नेष्टे यस्मै पुत्रासो अदिते
प्रजीवसे मर्त्याय ज्योतिर्यच्छंत्यजस्रं अदितेरदीनाय देवमातुः पुत्रा मित्रादयः अस्मै मर्त्याय मनुष्याय स्तोत्रे अजस्रमविच्छि
न्नं ज्योतिस्तेजो जीवसे जीवितुं प्रयच्छंति तस्य शत्रुर्नेश्वरः इत्यर्थः पक्षिरवाः शाकुनजपे कनिक्रददित्यादितृचयोः सूक्तयोः क
भार्गवः शौनकः कपिंजलपक्षिरूपेंद्रो देवता त्रिष्टुभः तिस्रो जगत्यः मध्योत्तिमा शक्वर्यष्टिर्वा कनिक्रदज्जनुषं प्रब्रुवा ३३

गृणन्ति वाचमरितेव नावं सुमंगलश्च शकुने भवासि मा त्वा काचिदति त्वा विश्व्या विदत् कनिक्रदत् पुनः पुनः शब्दायमा
नः जनुषं जनिष्यमाणमर्थं ब्रुवाणः सूचयन् कपिंजलः अरितेव कर्णधार इव नावं वाचमियर्त्ति प्रेरयति अथ प्रत्यर्द्धं
कृत्य हे शकुने कपिंजल त्वं सुमंगलः प्रकृष्टः कल्याणश्च भवासि भव किंच किंच काचित् अभिभाः को प्याभिभवः त्वां विश्वा
विश्वजनः सर्वो सुदिक्षु मा विदत् मा प्राप्नोयत् मा त्वा श्येन उद्वधीत् मा सुपर्णो मा त्वा विदद् इषुमान् वीरो अस्तात् पित्र्यामनु प्रदिशं
कनिक्रदत् सुमंगलो भद्रवादी वदेह हे शकुने त्वा त्वां श्येनः प्रबलः पक्षिविशेषः मा उद्वधीत् मा हिंसीत् सुपर्णः गरुत्मान् त्वां मो
द्वधीत् तथा इषुमान् बाणवान् अस्ता शराणां क्षेप्ता धन्वी त्वा त्वां मा विदत् किंचापि त्र्या प्रति दिशं दक्षिणां दिशं अनु दक्षिणस्या
दिशीत्यर्थः कनिक्रदत् पुनः पुनः शब्दं कुर्वन् सुमंगलः कल्याणमंगलः भद्रवादी शोभनवादी सन् इहास्मद्विषये मंगलं वद
सूचय अव क्रंद दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकुने मा नस्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः श
कुने हे कपिंजल त्वं सुमंगलो भद्रवादी च सन् गृहाणां दक्षिणतो दक्षिणस्यां दिशि अवक्रंद शब्दं कुरु दक्षिणतः शब्दायमानः
शकुनो मंगलं सूचकः हि नोस्माकं स्तेनस्तस्करो मेशत मेशिष्ट अघशंसः अनर्थानाशंसः सको पि मेशिष्ट वयं च सुवीराः

शोभनपुत्रादिसहिताः विदथाय यज्ञे बृहन्मंत्रजातं वदेमोच्चारयाम भृशं तुभ्यमित्यर्थः प्रदक्षिणिदभि गृणन्ति कारवो वयो
वदंति ऋतुथात्र शकुंतयः उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानुराजति शकुंतयः कपिंजलाः ऋतुथ कालेकाले
ख वयो न्नं वदंतः सूचयंतः कारवः स्तोतारश्च प्रदक्षिणिन् प्रदक्षिणांश्च निगृणन्ति अभिवदंतु बहुवचनं पूजार्थं किंच उभे वा
चौ गानं च स्तोभस्य साम गायत्रं त्रैष्टुभं च सामनी इव शकुंतिर्वदति अनुराजति च सुगानो अनुरक्ता करोतीत्यर्थः उद्गा
34 तेव शकुने साम गायसि ब्रह्मपुत्र इव सवने सुशंससि वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्व
तो नः शकुने पुण्यमावद शकुने हे कपिंजल त्वं उद्गातेव साम यथोद्गाता साम गायति तथा त्वं साम गायसि गानस्वरं करोषि
वृषेव वाजी सेवनसमर्थो श्वः शिशुमतीः वडवाः अपीत्या अभिगत्य शब्दं करोति तथापि त्वमपि वदसि शिष्टं स्पष्टं आवदंस्त्वं
शकुने भद्रमावद तूष्णीमासीनः सुमतिं चिकिद्धि नः यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः शकुने हे क
पिंजल आवदन् शब्दं कुर्वन् त्वं भद्रमावद मंगलं वद तूष्णीमासीनः तूष्णीं तिष्ठन्नपि नो अस्माकं सुमतिं शोभनां मतिं चिकि
द्धि बुध्यस्व यदुत्पतन् उत्पतन्वदसि कर्करिर्यथा कर्करीव वदसि कर्करिः वाद्यविशेषः सुवीराः शोभनपुत्राः वयं विदथे य ३८

त्ते बृहत्सूक्तं जातवेदसे भ उच्चारयेमनुष्यमिति शेषः देवीं वाचमित्यस्याः भार्गवो नेमो वाक्त्रिष्टुप् देवीं वाचमजन
यंत देवाः तां विश्वरूपाः पशवो वदंति सानो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु यो देवां देवोत्तमानां माध्य
मिकां वाचं देवा माध्यमिका अजनयंत जनयंति तां वाचं विश्वरूपाः सर्वरूपाः व्यक्तवाचो व्यक्तवाचश्च पशवो वदंति
तत्पूर्वकत्वाच्छाकप्रवृत्तेः सा वाग्देवी मंद्रा भरनीया स्तुत्या हर्षयित्री वृष्टिप्रदानेन नो अस्मभ्यमिषमन्नमूर्जं पयो घृतादि
रूपं रसं च दुहाना रक्षंती धेनुर्धेनुभूता सुष्टुतास्माभिः स्तुतानास्मानुपैतु प्रगच्छतु वर्षणायोद्युक्ता इत्यर्थः शिवा देवप्रि
यवचने स्तुहि श्रुतमित्यस्याः शौनको गृत्समदो रुद्रस्त्रिष्टुप् स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रं मृडा
जरित्रे रुद्र स्तवानोऽन्यं ते अस्मिन्निवपंतु सेनाः हे स्तोमः श्रुतं प्रख्यातं युद्धं स्तुहि कीदृशं गर्तसदं गर्तो रथः तत्सीदंतं
युवानं तरुणां मृगं न भीमं मृगं सिंहमिव भयंकरं उपहत्नुं उपेत्य हंतारं शत्रूणां उग्रमुद्गूर्णं हे रुद्र त्वमस्माभिः स्तवानः
स्तूयमानः सन् जरित्रे स्तोत्रे मह्यं मृलया सुखं यतेन दीयाः सेना अस्मदन्यं अस्मद्व्यतिरिक्तं पुरुषं निवपंतु निघ्नंतु उ

ल्मुकनिरसने अभयं मित्रावरुणा मह्यमस्त्वर्चिषा शत्रून् दहतं प्रतीताज्ञातारं माप्रतिष्ठां विदंतु मिथो विघ्ना
नाउपयंतु मृत्युं उल्मुकान्निरसने हे मित्रावरुणौ मित्रावरुणौ मह्यमभयमस्तु युष्मत्प्रसादात् भयरहितत्वमस्तु
३ अर्चिषा युष्मदीयेन तेजसा शत्रून् प्रतीत्याभिगम्य दहतं भस्मीकुरुतं माज्ञातारं युष्मन्महिम्नः ज्ञातारं अस्मदादि
माहूतं माप्रतिष्ठां विदंतु अस्मदीयाः शत्रवः प्रतिष्ठां स्थितिं माविदंतु माप्रविदंतु माप्नुवंतु किंच मिथो विघ्नाना अन्यो
35 न्यं भेदनं कुर्वंतस्संतः मृत्युमुपयंतु प्राप्नुवंतु सर्वतो भये उत्पन्ने अष्टौ मंत्राः पृथिवी वृता साग्निना वृता तया वृतया
वृत्या यस्माद्भयाद्बिभेमि तद्द्वारयेस्वाहा पृथिवी वृता वृज वरणे वृणोतीति कर्तरि क्तः सर्वत्रापीत्यर्थः एवंभूता सा पृ
थिवी अग्निना वृता वृज संभक्तावित्यस्मात् कर्मणि क्तः संभक्तिः सेवा अग्निना सेविता अग्नेस्तस्या अधिपतित्वात् त
या वृतया आग्न्यधिष्ठितया वृत्या वृणोतीति वृत्तिः तया वृत्या निमित्तभूतया यस्माद्भयात् पृथिवीसंबंधात् भयात् बिभेमि ग
भीतिं प्राप्नोमि तद्भयं अनया आवृत्या तद्भयं निवारयामि स्वाहा इदं हविः स्वाहुतमस्तु अंतरिक्षं वृतं तद्वायुना वृतं तेन ३५

वृतेनेव त्रैणाय स्मेत्यादि अंतरिक्षं वृतं अत्र वृता दिशा वृत्तानां पूर्वोक्त एवार्थः वायुना वृतं वायोरंतरिक्षाधिपतित्वात् तद
धिष्ठितं वत्रेण वरुणा शीलं व ज्ञेवृ जवरणाइत्य स्यादेशादिक स्फन्यन्यथः तेनैव वृत्रेण निमित्तभूतेन यस्मादित्यादिरु
क्तार्थः द्यौर्वृतादित्येन वृतानया वृतया वृत्यायस्मादित्यादि द्यौः सादित्येन वृता आदित्यस्य तस्या अधिपतित्वात्
एवं लोकत्रय सूर्याद्यधिष्ठानात् खं सूर्यो नो दिवस्पात्वित्यथेत्र सूयते शिष्टं यत् दिशो वृताः ताश्चंद्रमसा वृताः
ताभिर्वृताभिश्च वत्रीभिः यस्मादित्यादि ता दिशः चंद्रमसा वृताः अधिष्ठिताः दिशां चंद्रमसाधिष्ठितत्वं तत्प्रकाश्यत्वात् अ
न्यद्व्याख्यातं प्रजा वृतास्ताः प्राणेन वृतास्ताभिर्वृताभिः वत्रीभिः यस्मादित्यादि प्रजा वृताः सर्वत्र व्याप्ताः तासां व्याप्तत्वं
व्याप्त्यादिप्रायेण प्राणेनऽपीवेन वृता अप्सा वृताः अधिष्ठिताः दिशां चंद्र अन्यत्पूर्ववत् आपो वृतास्ता वरुणेन वृता
स्ताभिर्वृत्रीभिः यस्मादित्यादि ता आपो वृताः सर्वत्र व्याप्ताः ताः वरुणेन वृताः अधिष्ठिताः तासां तस्याधिपतित्वात् अन्य
त्पूर्ववत् वेदाः वृतास्ते छंदोभिर्वृतास्तेभिर्वृतेभिः वत्रीभिः यस्मादित्यादि वेदा वृताः सर्वत्र व्याप्ताः नित्यत्वात् ते छंदो

भिः गायत्र्यादिभिः वृताः व्याप्ताः हे भिः स्तैः तैर्भिर्वृतैः तिष्ठ सप्त प्रदेशाः छंदभिर्विकल्पितत्वादशांश न्यत्स्य ष्टं सर्वं स
र्वं वृतं तद्ब्रह्मणा वृतं तेन वृतेन वत्रैशा यस्मादित्यादि सर्वं वृतमेतत्सर्वं जगत् वृतं सर्वत्र व्याप्तं तद्ब्रह्मणा वृतं सद्रूप
५ स्य सर्वस्य ब्रह्मरूपत्वे नावस्थानात् ब्रह्म वृतत्वं तेन वृतनेत्यादिगतं इशान्यां स्थित्वा जपेत् स्वस्ति नो मिमीतेति खिलस
36 हितानां सप्तर्चं आत्रेय स्वस्त्यात्रेयो विश्वे देवा स्तिस्रो जगत्यः त्रिष्टुभ्वा द्या अनुष्टुभौ त्रिष्टुभौ च स्वस्ति नो मिमीता
वश्विना भगः स्वस्ति देव्यदितिरनर्वणः स्वस्ति पूषाऽसुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना नो अस्मभ्यं अश्विना
अश्विनौ अस्ति अविनाशं क्षेमं मिमीतां कुरुतं भगः स्वस्ति क्षेमं मिमीतां तथा देव्यदितिश्च स्वस्ति मिमीतां अन
र्वणाः प्रत्यंचः पूषा असुरः शत्रूणां हिंसिता प्राणानां बलानां दाता स्वस्ति दधातु नो अस्मभ्यं द्यावापृथिवी द्यावा य
पृथिव्यावपि सुचेतुना शोभनेन विशिष्टे स्वस्ति मिमीतां स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ६
बृहस्पतिं सर्वगणां स्वस्तये स्वस्तय आदित्यासो भवंतु नः स्वस्तये क्षेमाय वायुमुपब्रवामहै स्तुमहे त्यर्थः सोमं वो

३६

पब्रवामहे यश्च सोमो भुवनस्य यस्पतिः पालकः सर्वलोकस्य जीवनःत्य स्य सोमायतनत्वात् तथा सहर्वेगुणां सर्वेचदेव
गणो पेतं वृहस्पतिं वृहतःकर्मणो मंत्रस्य प्रपालकापितः यं स्वस्तये स्मभः आदित्यासःआदित्याश्चदितेःपुत्राः सर्वेदेवाः
अरुणादयः द्वादशावा नोअस्माकं स्वस्तये भवन्तु विश्वेदेवा नो अद्यास्वस्तये वैश्वानरो वसुरग्निः स्वस्तये देवास्त्ववन्त भव स्व
स्तये स्वस्तिनोरुद्रःयात्वंहसः विश्वे सर्वेपिदेवानां अस्मानृअद्यास्मिन्यागदिने स्वस्तये क्षेमायावंतुः वैश्वानरः विश्वए
नंनयंतीति वैश्वानरः वसुः सर्वेस्यवासयिता अग्निर्देवाप्रथमे वाग्निःवैश्वानर इतिशाकपूणिरिति यास्कः स्येपि स्वस्तये
वसुदेवा अभवोपि स्वस्तये वंतुरुद्रो दुःखात्द्रावयिता देवोपि त्वंहसःपापात् स्वस्तियातु नो अस्मान् स्वस्तिमित्रावरुणा
स्वस्तिपथ्येरेवति स्वस्तिनइंद्रश्चाग्निश्च स्वस्तिनोऽदितेकृधि हेमित्रावरुणामित्रावरुणो अहोरात्राभिमानी देवो स्वस्ति
कुरुतं हेपथ्येपथ्याःअंतरिक्षमार्गःतत्रहितःपंथास्तन्मार्गाभिमानिनी देवता तत्सशि रेवति धनवति रेवतिस्वस्तिकृधि
कुरु स्वस्तिपंथामनुचरेम सूर्याचंद्रमसाविव पुनर्ददताघ्नताजानता संगमेमहि पंथाः पंथानं स्वस्तिक्षेमेणानुचरेम

37

सूर्याचंद्रमसाविवतौतथानिरालंबेमार्गेराजसमादिमिथुनु पटतौसंचरतः तद्वत् किंचवपत् प्रवसंतःपुनर्ददताश्विम
तंश्वघ्नाचिरकारविलंबकोपेनदिशातोजातनताश्वविस्मरताथदीयःचिरकालंगतःकोयमितिसंदेकेहमकुर्वताम
हीयोयमितिबुध्यमानेनेत्यर्थः उत्कलस्यशोनवंधुजननेन संगमेमहिसंगछेमहि स्वस्त्ययनंतास्येमरिष्टनेमिमहद्भू
तंवायसंदेवतानां असुरघ्नमिंद्रसखंसमत्सुवृहद्यशोनावमिवारुहेम तार्क्ष्यंनृहपुत्रंगरुत्मंतंकीदृशं स्वस्त्ययनंहेमप्रा
प्तिहनुंअरिष्टनेमिंरिष्टाहिंसातांद्विपरीताअरिष्टातेषांनेमीरक्षकं यथारथचक्रस्यनेमिः तद्वत् महत्प्रमाप्रमाणतःप्र
5 भावतश्चभूतं प्राणिविशेषं उभयत्रछांदसोलिंगव्यत्ययः महद्भूतं स्नानकरतिवत् वायसंगमनशीलं देवतानांमध्ये
परिगणनायंइतिशेषः तद्रूपकालगतत्वात् तदेवप्रतिपाद्यते समेसंग्रामेषुइंद्रसखंतत्सहायंअतएवासुरघ्नमसुरहं
6 तारंवृहन्महत्यशःकारणांएवंभूतंतार्क्ष्यमारुहेम आश्रयंयाम तत्रदृष्टांतःयथानावमारूढाःनिर्विघ्नंसमुद्रपारंगछंती उः
तितद्वत् अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचतार्क्ष्यं प्रयतपाणिःशरणंप्रपद्येस्वस्तिसंबाधेश्वभयंनोअस्तु ना

३७

मानंनृषिं आंगिरसं बृहस्पतिं गायमेतं नामानं आत्रेयं तदुपकालकत्वात् यशःकारणं एवंभूतं नास्येमरुहेम स्वा स्व
स्यात्रेयं नास्येंगेरुत्मतं एतानृषीनूकमो विप्रार्थं शुध्यर्थं प्रयतपाणिः नयतपाणिः उपलक्षणमेतत् सर्वेन्द्रियनिय
मनस्य मनसा वाचा शरणं प्रपद्ये प्रपत्येकं प्रपन्नोस्मीत्यर्थः संबाधेषु शत्रादिसंमर्देषु नोस्मभ्यं स्वस्तिविनाशो ऽयत्नं
वाक्यं यत इंद्रेत्यस्याः प्रगाथो भर्ग इंद्रो युजो बृहत्यः अयुजः सतोबृहत्यः यत इंद्र भयामहे ततो नो अभयं कृधि मघव
ञ्छग्धि भव तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि हे इंद्र यतः हि सकाशान् भयामहे वयं ततो नो अभयं कृधि कुरु हे मघवन्नथ
हि शक्तो भवसि नो अस्मभ्यं अभयं कर्तुं अतः तेहि तव त्वदीयैः ऊतिभिः रक्षणैः रक्षकैः पुरुषैर्वा किंच विजहि द्विषो ऽस्मद्द्वे
ष्टॄन् विजहि मृधो ऽस्मद्धिंसकान् सकाशात् त्वं हि राधस्पते राधसो महः क्षयस्यासि विधर्ता तं त्वा वयं मघवन्निंद्र गिर्वणः सुताव
न्तो हवामहे हे राधस्पते धनस्वामिन् त्वं हि विखलु महो महतो राधसो धनस्य क्षयस्य च गृहस्य च वर्द्धयिता करलसम
र्थो देवं लभ्यते कस्य राधसो गृहस्य वर्द्धको विधर्त इत्युच्यते विधः परिचरतो यजमानस्य तं तादृशं त्वा त्वां च वयं हे मघवन्

इंद्रं गिर्वणो गीर्भिः गिर्वणो गीर्भिर्वननीय सुहवं तो मिषुत सोमा हवामहे आह्वयामहे इंद्रस्य तु नत्वत्र हृद्वा परस्या नो
वरेण्यः स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु रुणाः पुरः अयमिंद्रस्य सर्वस्य ज्ञातात्राताने क मोउताहं वृत्रहा वृत्रहं
र २ नीपरस्याः परपालयिता वोऽस्माकं वरेण्यो वरणीयः स इंद्रो नोऽस्माकं पुत्रमितिशेषः रक्षिषत् रक्षतु चरमं पुत्रं तथा स
38 रक्षिपत् स मध्यमं पुत्रं रक्षिषत् पश्चाद्रक्षिषत् नः पुरः पुरस्तात् रक्षिषत् त्वं नः पश्चादिभिः हे इंद्र त्वं नोऽस्मान् पश्चात्
पश्चाद्भागः पुरः पूर्वभागोऽधरादधोभागः एतदुपरिभागस्योपलक्षणं उत्तरात् उत्तरभागः एतदुपरिभागस्योपलक्ष
णं उत्तरात् उत्तरभागः एतद्दक्षिणाभागस्याप्युपलक्षणं किंच बहुना विश्वतः सर्वस्मात् निपाहि हे इंद्र दैव्यं भयं अस्म
दस्मत्तः आरे दूरे कृणुहि कुरु तत्र थास्रदेवीः आयुधान्यारे कृणुहि अद्याद्याश्व श्व इंद्रत्रास्व परे च नः विश्वाच भोज
जरितृन् सत्पते अहा दिवा नक्तं च रक्षिषः अद्याद्य शश्वो वाद्य भहरति तत्र सर्वत्र एवं श्वश्वः त्रास्व रहत याच परेच परस्मि
न् तृतीयेहनि त्रास्व हे सत्पते सभापालक विश्वाच सर्वाणयहानि सर्वेष्वथहस्सु नोऽस्मान् जरितृन् स्तोतृन् रक्षिषो रह ६

सेतया हर्दिवानक्षं च रक्षिषः रक्षांप्रभंगानि अयं मघवेंद्र प्रभंगी प्रभंजनशीलः शूरः तुवीमघः त तु धनं संमिश्रः सम्यक्
मिश्रयिता शत्रूणां समर्थे वीर्यो यद्वीर्यैः करणाय्यं कमिति पादपूरणं एवं महानुभावो भवति अथ प्रत्यवादः हे इंद्र ते उभा
वपि वाहू वृषणौ वर्षकौ कामानां हे शतक्रतो वडुपस्त ययो वज्रमायुधं निमिमिक्षितुः परिगृह्णातो अथ विवाह मधुप
कादि गृह प्रवेशांत मंत्रार्थाः उपाधवेशने अहं वश्मे सजातानां विद्युतामिव सूर्यः इदं तमधितिष्ठामि यो मा कश्चाभिदा
सति सजातानां समानकायजातानां विद्युतां विशेषेण द्योतं तो इति विद्युतः विद्युदादि तेजसां वर्ष्मे सूर्येश्च सूर्यो यथा अ
हनि स्वेनं सह स्थितानां तेषां तेजो रूपं वर्ष्म अधिष्ठायापहरतीति शेषः त इतत् अहं कश्च कश्चिदपि शत्रुः मासां अभिदास
ति दसु उपद्य सर्वतः क्षपयति तदिदं इदानीं अधितिष्ठामि आक्रम्यास्थितोस्मि अनेन विष्टराक्रमणेन शत्रुतेजोनश्य
त्वित्यर्थः अमृतोपस्तरणमसि हे अमृत त्वं उदकं त्वं आह इति रूपस्य मधुपर्कस्य उपस्तरणमास्तरणमसि भव मित्रस्य
त्वा चक्षुषां प्रतीक्षे इति महानाम्नी व्रते व्याख्यातं देवस्यत्वेति मधुपर्कधारणमंत्रः उच्यते नयने व्याख्यातः द्वितीयवरंम

धुपर्कावेक्षणे मधुवाताऽइत्यस्य राहूगणोगोतमऋ विश्वेदेवागायत्री मधुवाताऋतायतेमधुक्षरंति सिंधवः माध्वीर्नः सं
छ न्त्वोषधीः ऋतायते ऋतं यज्ञमात्मन इच्छते यजमानाय वातावायवः मधुमाधुर्योपेतं प्रयच्छंतीत्यर्थः तथा सिंधवः स्यंदन
३९ शीलाः नद्यः समुद्रा वा मधुमाधुर्योपेतं स्वकीयं रसं क्षरंति प्रयच्छंति एवं नास्मभ्यं ओषधीः ओषधी फलपाकांता ओषध
यः स्वमाध्वीमाधुर्योपेताः संतुभवंतु मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः मधुद्यौरस्तु नः पिता नक्तं रात्रिर्नोऽस्माकं
मधुमधुमती माधुर्योपेता फलप्रदा भवतु उतअपि च उषसः कालोपलक्षितान्यहानि च मधुमंति भवंतु पार्थिवं रजः पृथि
व्या संबंधिलोकः अस्माकं मधुमत् माधुर्येविशिष्टफलयुक्ता भवंतु पिता वृष्टिप्रदानेन सर्वेषां पालयिता द्यौर्द्युलोकोपि
मधुयुक्तो भवतु रजः शब्दो लोकवाची लोका रजांस्युच्यंते इति यास्कः रजं त्यस्मि जना इति मधुमान्नो वनस्पतिर्मधुमाँ अ
स्तु सूर्यः माध्वीर्गावो भवंतु नः नोऽस्माकं वनस्पतिः वनानां पालयिता यूपाभिमानी देवः मधुमान् माधुर्योपेत फलवान ७
स्तु तादृशं फलमस्मभ्यं प्रयच्छत्वित्यर्थः सूर्यः सर्वस्य प्रेरकः सविता च मधुमानस्तु गावः अग्निहोत्रार्थाः धेनवश्चनो ३८
घः १

अस्माकं मध्वा माधुर्ये पितृपय्यस्याप्युक्ता भवंतु नवान्नपति: वनस्पति: पारस्कराद्दित्वात्सुट् वनस्पतिशब्दाद्युदा
त्तं दिऽश्रुत्वे मधुपर्कविकरणो वसवस्त्वा गायत्रेण छंदसा भक्षयंत्विति हे मधुपर्क अष्टौ वसवो देवास्त्वां त्वां गायत्रे
ण छंदसा सह भक्षयंतु रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंतु एकादश रुद्रा देवास्त्वां त्वां त्रैष्टुभेन छंदसा सह भक्षयंतु
आदित्यास्त्वा जागतेन छंदसा भक्षयंतु द्वादशादित्या देवा जागतेन छंदसा सह त्वां त्वां भक्षयंतु विश्वे त्वा देवा आनुष्टु
भेन छंदसा भक्षयंतु विश्वेदेवा: आनुष्टुभेन छंदसा सह त्वां त्वां भक्षयंतु विशां छंदोभि: सह सार्द्धं च ये ब्राह्मणाभिहि
ता: वसवस्त्वा गायत्रेण छंदसाऽदौ भूतेभ्यस्त्वेति त्वां भूतेभ्यो ददामीत्यर्थ: मधुपर्कप्राशने विराजो दोहोसि अन्नं
वै विराट् हे मधुपर्क विराजोन्नस्य दोहोसि क्षरयसि सारोसीत्यर्थ: विराजो दोहमशीय अत्र श्रुतपरिग्रहान्न विरा
जोन्नस्य दोह: क्षरणमशीय प्राप्नुयां मयि दोह: पद्यायै विराज: विराजोन्नस्य दोह: क्षरणं भक्ष्याविश्य पाद्या पाद्यायैव
प्राप्नुं योग्यायै संतत्यै भवतु इति विशेष: यद्वा पद्यायै पद्याया: षष्ठ्यर्थे चतुर्थी गंतव्याया विराजदोह: मयि अस्तु अ

50

मृतापिधानमसीति हे अमृत अनंत अवदान रूपस्य मधुपर्कस्य अपिधानं ढदनमसि सत्यं यशश्रीर्मयि श्रीः श्रयतां
मित्यपि मत्यादयः श्रयतां शरणं येन लक्ष्मीः कांतिश्च गो विसर्जने माता रुद्राणां मित्यस्या भार्गवो गौस्त्रिष्टुप् मातारु
द्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रणुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट यागौः रु
द्राणां महतां माता जननी वसूनां दुहिता पुत्री आदित्यानां स्वसा भगिनी अमृतस्य पयसो नाभिः आवासः स्थानं वासभा
गां मनागसं अदितिं अहीनां गां गोरूपं देवीं मावधिष्ट हे जनाः मावधिष्टेति चिकितुषे चेतनावते जनाय तु इदानीं प्रवो
चं अहं प्रावोचमिति श्रुष्टप्रमाणेभ्य उपदेशः कन्या प्रतिग्रहणे क इदं कस्मा अदात्कामः कामायादात्कामो दाता का
मः प्रतिगृहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णातु कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णातु या
वृत्तिः प्रकारविस्तारेयं कः प्रजापतिः इदं दक्षिणाद्रव्यं कस्मै प्रजापतये अदान् ददाति यजमाने ऋत्विजि च प्रजा ज
पतित्वसंकल्पो वृत्तिविशेष एषः अपि च कामः कामायादादित्यनुवदंति अथापि यजमाने ऋत्विजि च कामत्वं संक ९

५०

ल्यः व्यावृत्तिविशेषप्रकारः कामएवददातिनयजमानः कामः अभिलाषः कामपूर्वकत्वाद्ददानः यः कामएवप्रति
गृहीतानाहंकामस्यैवनिमित्तत्वात् प्रतिगृहस्यकामंसमुद्रमुपमेयंसमुद्रवदपर्यन्तंकाममाविषकामिनैवप्रतिगृ
हीतत्वात् कामेनत्वाप्रतिगृह्णामिकामेनप्रेर्यमाणोहंपराधीनत्वात् इदर्थमेवाप्रतिगृह्णामिनमदर्थंप्रतिग्राह्यंका
मेनप्रतिगृहीताइच्छारूपमायंनप्रतिगृह्णामि हेकामएतत्ते एतद्दक्षिणाद्रव्यंतेतवैवनमम वृष्टिरसितत्कारणा
त्वात् सर्वस्यैवकृत्स्नः द्यौस्त्वाददातुवृष्टिद्वारेणद्यौस्त्वात्वापृथिवीप्रतिगृह्णातुधारणद्वारेण अयमपिव्यावृत्तिप्र
कारः अग्नयेपृषिपवसइति व्याख्यातास्ति सः त्वमर्यमाभवसीत्यस्याः आत्रेयोवसुश्रुतोअर्यमात्रिष्टुप् त्वमर्यमाभव
सि यत्कनीनांनामस्वधावंगुह्यंबिभर्षि अञ्जन्तिमित्रंसुधितंनगोभिर्यद्दम्पतीसमनसाकृणोषि हेअग्नेत्वंअर्यमा
भवसि सर्वेषांनियमिताभवसियत् यदाकनीनांकन्यकानांसंबंधसि तृतीयोअग्निष्टेपतिरितिश्रुतेः किंचहेस्व
धावन्हविर्लक्षणावन्गुह्यंगोपनीयंनामबिभर्षिवैश्वानरइतितन्नामसुधितंसुष्ठुनिहितंमित्रंनामित्रमिवत्वांगोभिः

विकारेषु प्रतिशत्रुः गोविकारैः क्षीरादिभिः अंजतिर्लंपंति प्रीणायंतीत्यर्थः यद्यस्मादहं पतीजायायाः पती मनसा सभा
न भन स्कोकुरणाभिकरोषि पुजापतेनत्वद्धिति चोलेव्याख्यानं पाणिग्रहणे - गृह्णामिते सौभगत्वस्याः सावित्री
रु सूर्या सूर्या त्रिष्टुप् गृह्णामिते सौभगत्वाय हस्तं मया पत्या जरदष्टीर्यथासः भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गा
९ र्हपत्याय देवाः हे वधु स्ते हस्तं गृह्णामि किमर्थं सौभगत्वाय सौभाग्यार्थं मया पत्या त्वं यथा जरदष्टिः प्राप्तवार्धक्या
असौ भवति भगो अर्यमा अर्यमा सविता पुरंधिः पूषा वैते देवाः त्वां त्वां मह्यमदुर्दत्तवंतः किमर्थं गार्हपत्याय यथाहं गृह
५१ पतिः स्यामिति किमिवलाजाहोमे अर्यमणं नु देवं कन्या अग्निमयक्षत स इमां देवो अर्यमा प्रेतो मुंचाति नामुतः स्वा
हा अर्यमणं जगतो अर्यम इत्यर्यमाग्निः तपसिद्धं देवं द्योतमानं अर्यमणमग्निं रुक्मिणं कन्याः पूर्वाः अयक्षत इष्टव ९
त्यः इष्ट्वा च पतिमलंकृतः स इदानीमपि लाजाहोमे नेष्टः सो अर्यमा देवो अग्निः इमां कन्यां इतः पितृकुल्यान् मुंचतु मुंच
तु दीर्घः छांदसः मोचयत्वित्यर्थः नामुतः अमुतो भर्तृकुलान्न मोचयतु वरुणं नु देवं कन्या अग्निमयक्षत स इमां देवो

४१

वरुणः प्रेतोमुंचातुनामुतःस्वाहा वरुणं वृजवरणोत्तमसांवारकं देवं अग्निशिष्टं व्याख्यातं पूषणं नु देवं कन्या अग्नि
मयक्षत सइमांदेवः पूषाप्रेतोमुंचातुनामुतःस्वाहा पूषणं पुष्टपुष्टोरश्मिभिः पुष्यतइत पूषा देवेगिनः तकन्याइत्या
दि पूर्ववत् लाजाहुतीनांमध्येमध्येग्निभ्रमणे अमोहमस्मि सात्वंसात्वमस्यमोहं द्यौरहं पृथिवीत्वं सामाहमृग्युत्वा
वेव विवहावहै प्रजांप्रजनयावहै संप्रियौरोचिष्णू सुमनस्यमानौ जीवेवशरदःशतं अहं अमोयुलोकोस्मि सात्वं
त्वं सामूरसि सात्वमस्य व्याख्यातं सामाहं अहं सामरूपोस्मि क्ऌप्त्वं रुक्ऌपासि तांनाहं शावावां इह्यस्मिन्लो
के आविवहावहै आसमंतात्संगावहै प्रजांसंततिंप्रजनयावहै तुल्यादयावः कीदृशौ संप्रियौ इदमिदंकर्तव्यमिति
परस्परं संप्रियमाणौ रोचिष्णू सदृशसंबंधत्वात्परस्परा अयणीदीप्यमानौ सुमनस्यमानौ सुमनायमानानःशा
मलोपाभावः छांदसः सदृशावावां शतंशरदो जीवेव इममश्मानमारोहाश्मेवत्वंस्थिराभव सहस्वपृतनायतो
भितिष्ठ पृतन्यत इति देवधूः त्वं इममश्मानं दृषदमारोह अश्मेवत्वंस्थिराभव पृतनायतः पृतनाकामान्सहस्व

अभिभव अभिसवेपूतमन्यतःपूतनाकामाः तानेवाभिहूतिष्ठाभिभव यदिशिरवेवक्ष्ये चेन्यत्वामुंचामीत्य चो सावित्री
मूयो प्रतिपाद्योऽत्र त्रिष्टुब् अनुष्टुभौ प्रत्यामुंचामि वरुणास्य पाद्येन त्वावबध्नात् सविता सुषेवः ऋतस्य योनौ सुकृतस्य लोके
रिष्टां त्वा सह पत्या ददामि जात प्राणिनं स पिता प्रेरितो वरुण आत्म पाशे वेबध्नाति तस्मात् वरुणस्य पाशात् हे वधू त्वां प्र
म मुंचामि यत्पाशेन त्वां सविता वरुण प्रेरकः सुषेवः सुसुखः अवबध्नात् बंधनं कृतवान् यज्ञविनियोगपक्षे पत्नीयोक्त्रे
णावबध्नाति बंधस्य वरुणाभिमानी अतो वरुणस्य पाशात् आमन् प्रमुंचामि येनयोक्त्रेण सविता कर्मणाम् अनुज्ञाता देवत्वा
त्विग्या जेनावबध्नात् मोचयत्वाह मृतस्य यज्ञयोनौ यागस्थाने भूमौ सुकृतस्य लोके कर्मक्षेत्रे भूलोके वा अरिष्टामहिंसिता
त्वां पुत्राद्यर्थे पत्न्या सह ददामि स्थापयामि प्रेतो मुंचामि नायुतः सुबद्धाममुतस्करं यथेयमिंद्र मीढ्वः सुपुत्रा सुभगां
करणा इतः पितृकुलात् प्रमुंचामि त्वां नामुतः भर्तृगृहात् प्रमुंचामि अमुतो भर्तृगृहे सुबद्धां करं यथेयं कन्या हे इंद्र मीढ्वः
१० सक्तः सुपुत्रा शुभगा सुष्टुभाग्या पावासतितथा कुरुः सप्तपदस्पृत ऋभसो इष एके पदीभव सामामनुव्रता भव पुत्राचि १०

42

४२

दावहै वहू स्ते संतु जरदष्टयः इति इषेश्च न्नाय भव अन्नं यथा स्यात् एकपदी भव एकं पदं पादविक्षेपस्थाने यस्याः सा एक
पदी पादोन्यत्र दस्यामीति टीप् एवं द्विपाद्यादिषु द्रष्टव्यं भव वां भूस मृध्यर्थमेकं पदविक्षेपं कुर्वीत्यर्थः सासाता दृशीत्व
मामनुव्रता भव मां प्रत्यनुव्रता अनुगुणा व्रता भवं भया यद्व्रतं क्रियते तदेव व्रतं तस्याः सा अथवा मामनुव्रता मामनु स्युभिः
व्रतं यस्याश्च स्मि पतिव्रता भयेत्यर्थः इद्दश्यावावां बहू पुत्रान् विंदावहै ते पुत्रा जरदष्टय अष्टिः अश्नुयाप्नो इत्यस्मान्क्तिन् अ
ष्टिरायुर्वो व्याप्तिः जराम्भा जरायुक्ता अष्टिः येषां ते जरदष्टयः ऊर्जे द्विपदी भव ऊर्जे बलं तद्ब बलं यथा स्यात् द्विपदी द्वे पदे पादवि
क्षेपस्थाने यस्याः सा द्विपदी भवादि व्याख्यातः रायस्पोषेत्यादि रायो धनस्य पोषाय पुष्टो तव रायस्पोषो यथा स्यात् त्रि
पदी त्रीणि पदानि विक्षेपस्थानानि यस्याः सा त्रिपदी शिष्टं स्पष्टं मायो भव्यायेत्यादि मयः सुखं तद्भावयतीति मायोभूत
स्याः भावो मायो भव्य यथा स्यात् चतुष्पदी चत्वारि पदविक्षेपस्थानानि यस्याः सा चतुष्पदी भवादि व्याख्यातः प्रजाभ्यः
पंचपदीत्यादि तव प्रजा यथा स्युः पंचपदी पंच पादविक्षेपस्थानानि यस्याः सा पंचपदी ऋतुभ्य इत्यादि ऋतवः षड् सा

ग्वि

रव्याकाःतेभ्यःनवंतेयथास्मत्कृतमावर्त्तेते अनेनआयुर्वृद्धिरूपलक्षिता सखासप्तपदीत्यादि सप्तपदानियथाआ
क्रांतानि सप्तसप्तपदी एवंभूतात्वंसखासखीभवममेत्यर्थः वाशिवंसर्गेजीवपत्नीप्रजांविंदेयेति वः पतिः यस्याःसाजी
११ वपत्नीअहंप्रजांविदेयलभेय दंपत्योःप्रयाणे पूषात्वेतोनयतिंत्यस्याःसावित्रीसूर्याप्रतिपाद्यार्थःत्रिष्टुप पूषात्वेतो
अ नयतुहस्तगृह्याश्विनात्वाप्रवहतांरथेनागृहान्गच्छगृहपत्नीयथासोवशिनीत्वंविदथमावदाथ हस्तगृह्यहस्तंगृहीत्वापू
षात्वात्वांइतोनयतुप्रापयतु अश्विनात्वात्वांरथेनप्रवहतंप्रगमनं गृहान्भर्तृसंबंधीनांगच्छत्वं यथागृहपत्नीयथासः
भवसिगृहस्वामिनीभवसिवशिनीसर्वेषांगृहाणांवशेप्रापयित्रीयथत्युवेशेवर्त्तेसानाविविदथंपतिगृहंआवदासिगृहस्थित
५३ भृत्यादिजनेनमावेदानावारोपणोक्रामणे अश्मन्वतीरियतय यस्याःदेवानांपरस्परसंवादात्तएवऋषयोदेवतास्त्रिष्टुप्अ
नयादेवायज्ञंजिगमिषवःपरस्परंवदंते अश्मन्वतीनामनवानीयतेगच्छतिरिगतिरेषणायोःतांयज्ञगमनायोत्तरीतिसुतिष्ठ ११
तद्वछततथाकृत्वाप्रतरतांनदीअल्लंघ्यानयतंहेसखायोयजमानस्यसततइति देवानांसंबोधनं अत्रयस्यांनद्यांजहामपरि ८३

न्यजाभकानीतिउच्यते येऽश्शेवाः शेवमिति सुखनामयेश्च सुखभूताः श्वयनेछासन्तु श्मानाश्रित्यवंतितेतान् जहीम
तथा कृत्वा शिवान् शिवान् सुखकरान् वीजान् अन्नानि अवीष्य प्राप्तुमुत्तरेम वधांरुदंत्यां जीवंरुदंतीत्येषा शिवेनो जगती
गजीवंरुदंतीतिरुदत्यां विवाहाग्निमग्नुतोजस्तंनयंतिकल्याणेदेशवृक्षवनुष्पथेषु हेऽश्विनोयुवयोश्चनुग्रहात् येनरः
पतयो जायानांजीवंतिजीवन अरिष्यनिरुदंतिरोदनेनापिजायानां रोदनमेवस्वामतइत्यर्थः तावकेऽश्वरेयज्ञे विमयं
ते निवेशयंतेनिवेशयंतिच किंच तासु दीर्घां महंतींप्रसितिंतु जयः प्रबंधनमसुदीधियुः अनुदधति इदवार्धं वननीयंश्च
पत्यं पितृभ्यः संपरिते समेरजत् जवतेभ्यः पितृभ्यः जनयोजाया परिष्वजे परिष्वंगार्थी मयः सुखं कुर्वंतीतिशेषः कल्या
णेषुदेशवृक्षचतुष्पथेषुजयः व सो माविदन्यरिपंथिन इत्यस्याः सावित्री सूर्या सूर्यानुष्टुप् माविदन्परिपंथिनोयआसी
दंति दंपती सुगेभिर्दुर्गमतीताभयइंताराजयः पीरपंथिनः पर्यवस्थानारयः शत्रवो माविदन् माप्रापयन् येपरिपंथिनः
सासीदंति अभिगछंति सुगेभिः सुगैः यागैः दुर्गं दुःखेनगतंशक्यं दुर्गमंदेशमतीतां अभिगछतां अरातयः अदातारः सुमंग

लीरित्यस्याः सावित्री सूर्या सूर्येत्नुष्टुप् सुमंगलीरियंवधूरिमांसमेत पश्यत सौभाग्यमस्यै दत्वायथास्तं विपरेतन इयं
ट वधूः सुमंगलीः शोभनमंगला अतः कल्पोरः समेतसंगछतां पश्यतवतां संगतानाश्च ईष्टा स्याजदाये सौभाग्यं दत्वा यद्वा
२२ अधास्तं गृहनाभिमत्र संवेशमगृहं प्रति विविधं परेतन परागछत वध्वागृहप्रवेशने इहप्रियमित्यस्याः सावित्री सूर्या सूर्ये
पतिपद्यो यौ जगती इहप्रियंप्रजयानेसमृध्यतामस्मिन्गृहे गार्हपत्यायजागृहि येनापत्याजन्वं संसजस्वथाजिव्री विद
५५ धमावदाथं हेवधूते नवइहास्मिन्पतिकुले प्रियंप्रतिप्रजयासह समृध्यतां अस्मिन्गृहे गार्हपत्यायगृहपतिसायजागृहि
बुध्यस्व एनाअनेन येनापत्यात्नन्वंस्वयं शरीरंसंसृजस्व संसृष्टाभव अथाजीवीजीर्णौ जायापती युवांविदथगृहमावदाथः
अभिमुख्येनवदथ गृहप्रेशनीवाह्निपदेसंचतुष्पदे हेवधूस्अघोरचक्षुः अक्रोधात्भयंकरचक्षुः एधि यथापशुभ्यः शिवा
हितकारिणी भवसुवर्चोभववीरसूर्नेव पुत्राणामेवप्रसवित्री देवकामा स्योना सुखकरी भव इमांत्वमिंद्र मीढुः सुपुत्रां
सुभगांकृणु दशास्यांपुत्रानाधेहि पतिमेकादशं कृधि हेमीढुः अभिमतवर्षक इंद्र त्वमिमावधूं सुपुत्रां सुभगांकृणु कृ १२

४४

धि अस्यांवध्वां दशपुत्रानाधेहि पतिंएकादशंकृधि दशपुत्रापितरेकादशकाय थास्यातयाकृधिकुरा॥ सम्राज्ञीश्व
शुरेभव संम्राज्ञी श्वश्रुवां भव ननांदरि संम्राज्ञी भव संम्राज्ञी अधिदेवृषु हे वधू श्वशुरादिषु त्वं सम्राज्ञी भव
इतरेषु इत्यर्थः पत्युस्वसा ननंदा श्वश्रूश्वसुरपत्नी याज्य होमे प्रजामित्यादि पंचचो सावित्री सूर्या सूर्या याजगती द्वितीया
त्रिष्टुप् तिस्रोनुष्टुभ आनः प्रजांजनयतु प्रजापति राजरसाय समनक्त्वर्यमा अदुर्मंगली पतिलोकमाविश शनो भव
द्विपदे शंचतुष्पदे प्रजापतिरस्माकं प्रजामजनयतु अर्यमा आजरसाय जरापर्यंतं जीवनाय समनक्तु संगमयतु सा
त्वं अदुर्मंगली दुर्मंगलरहिता सुमंगली या या न्मंगलाचारान् दूषयति सा दुर्मंगली ततोन्या अदुर्मंगली तादृशी भव लोक
समीपमाविश प्राप्नुहि नोद्विपदे सचतुष्पदे अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामा स्यो
नाशनोभ श्वसुरादिषु शुश्रूषादीनां नैकतवहुमानेन समाजनोति शिष्टं स्पष्टं हृदयं जानेदधि प्राशयेत्ता सम
जनतु विश्वेदेवाः समापो हृदयानिनौ संमातरिश्वा संधाता समुदेष्ट्री दधातु नौ विश्वेदेवाः सर्वेदेवाः नौ हृदयानि मानस शुद्धि

मन्त्रांस्तु म[illegible]न्तु दृष्ट्वादि [illegible] [illegible]कनालोकिकवैदिकविषयेषु प्रकाशानि कुर्वन्ति त्वर्थं [illegible]

४५ गुनर्याजातनिरिष्टताना [illegible] मंत्रयाग्नेयादयोस्तु [illegible] परस्परानुकूलाः कर्तव्यार्थं संगीताश्च [illegible]

९ नीत्यर्थः एवंसंपत्ता [illegible] इतिगणेशानादि मंत्रभाष्यं समाप्तं श्रीगुरवेनमः शुभमस्तु [illegible]

१०५७

१२

45

४५

ग्रंथ श्लोक संख्या १०६।